25. किञ्च पूर्वाचार्याणां प्रामाण्यं पाणिन्यादीनामप्यनुमतमेव। आङि चापः, औङ आपः इत्यादौ पूर्वाचार्यमतसाक्षात्संज्ञाया एवोपात्तत्वात्। **व्योर्लघुप्रयत्नतरः शाकटायनस्य, वा सुप्यापिशलेः, वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः** इत्यादौ पूर्वाचार्यमतस्य साक्षादुपादानाच्च। न हि पूर्वाचार्यसङ्कीर्तन-मात्राद् विकल्प उत्तिष्ठति। तन्मतमेवं मम मतमेवमिति तन्मतोपादानादेव विकल्पसिद्धिः। किञ्च **तदशिष्यं संज्ञाप्रमाणत्वात्, लुब्योगाप्रख्यानात्** इति पूर्वाचार्योक्तं पाणिनिः स्वयमेव दूषयित्वा पुनः **जनपदे लुप्** इत्यादीनि दूषितचराण्येव पूर्वाचार्यवचनानि स्पष्टमुपादत्ते। तेन ज्ञायते क्वचित् युक्तिरसाद् दूषणे कथिते,,पि पूर्वाचार्यवचनमु-पादेयमेवेति।।

25. Further, the authority of the ancient teachers is acceptable to Panini and others. For example, in the rules *'ani capah'*,[112] *auna apah*[113] etc., the technical names accepted by the ancient teachers are directly maintained. In [the rules "According to *Sakatāyana* (the sounds) va and ya may be pronounced with less stress'[114], According to Apisali [the rule is] optional when a nominal verb follows[115], Bhaguri desires an

---

[112] Pa. VII. 3. 105. an is the name for the instrumental' singular according to the pre-Paninian grammars.

[113] ibid. VII. 1. 18. aun stands for the dual numberi of both nominative and accusat ive. This samjnā is taken from the ancients.

[114] ibid. VIII, 3 18

[115] ibid. VI. 1. 92.

In Public domain: Digitization Muthulakshmi Research Academy
elision of the a in the prefixes ava and api[116], views of the ancient teachers are also directly expressed. A rule does not become optional by simply mentioning the names of the ancient teachers; only when their view is recognized as 'this is their View and this is mine', the rule could be optional. Moreover, after criticising what is said by the ancient teachers, in the instances 'this (i.e., concord of gender and number) need not be ruled because it has the authority of conventional term'[117], 'elision [need not also be ruled] because of the noncurrency of the etymological meaning'[118], in the rules like 'when meaning the kingdom [these affixes] elide'[119] Pānini clearly accepts the words of the ancient teachers which were once criticised. By this it is understood that even though in certain cases for the sake of the pleasure of reasoning criticisms are offered, the words of the ancient teachers are nevertheless acceptable.

26. एवं पाणिनिना स्वेन दूषितस्यापि सङ्ग्रहात्।

पूर्वाचार्यमतं क्वापि व्याख्यादौ दूष्यते यदि।।

युक्तिप्रौढिरसेनैवत्यवगच्छन्तु कोविदाः।

---

[116] Though this is not found in MB, Rüpuvatāra and Prakriyt-kaumudi See vol I. p. 131 and vol. I, p. 317, respectively.

[117] Pã. I. 2. 53.

[118] ibid. 1. 2. 54.

[119] ibid. IV. 2. 81.

In Public domain. Digitization Muthulakshmi Research Academy

तावता हेयता नेति ज्ञापयामास पाणिनिः।।

तेन पाणिन्युक्तं प्रमाणमित्यङ्गीकुर्वतापि तदभिमतत्वादेव पूर्वशास्त्राण्यपि प्रमाणमित्यङ्गीकर्तव्यम्। तदिदमुक्तम् – **पूर्वोक्तं पाणिनिश्चाप्यनुवदति** इति।।

26. In this way since Pänini accepts even that which is criticised by him, if elsewhere in the commentaries, etc., the view of the ancient teachers is found criticised, it is only for the pleasure of displaying self-confidence in argumentation. Let this be understood as such by the learned. Pānini has not, therefore, indicated the rejection [of others' words.]

Therefore he who accepts the authority of what is said by Pānini alone has [necessarily] to accept the authority of older texts also because they are accepted by him (Pānini). This is what is meant by 'Pänini also quotes what is said by his predecessors'.

27. किञ्च **अनादिश्चैषा व्याकरणपरम्परा** इत्युक्तत्वात् पूर्वव्याकरणमूलमालोच्य पाणिनिनापि शास्त्रं कृतमिति वक्तव्यम्। **तेन प्रोक्तम्** इत्यत्रैव च **पाणिनीयं शास्त्रम्** इत्युदाह्रियते, न **कृते ग्रन्थे** इत्यत्र। तस्मात् पाणिनिनापि शास्त्रस्य प्रत्याहारविशेषशालित्वेनोक्तत्वमेव ; न कृतत्वम्, इत्यवगम्यते। ततश्चापणिनीयत्वात् पूर्वशास्त्राणामप्रामाण्यं

In Public domain. Digitization Muthulakshmi Research Academy
वदता पाणिनीयस्यापि निर्मूलत्वादप्रामाण्यमेवापादितमिति सकलव्याकरणभञ्जनं सञ्जनितं महाशाब्दिकैः।।

27. Moreover, it is said that 'this tradition of grammer is without a beginning'[120]; so it is to be maintained that Pānini wrote his treatise after considering the previous grammars as his source. The example, 'treatise of Pāṇini'[121] is given under the rule enounced by him'[122] and not under (in the meaning of) a book made on [a subject]'[123]. So it is understood that Pānini only enounced the science of grammar with a different type of technical precision and did not himself invent it Therfore, he who says that the previous treatises do not have authority because they are non-Paninian is virtually proving that the treatise of Panini does not have authority because it does not have any source. In this way the demolishment of all grammars is brought about by the great grammarian that you are.

28. ननु पाणिनिः पूर्वशास्त्राणि प्रयोगान्तराणि च दृष्ट्वा तेषु हेयभागमपहाय शास्त्रं कृतवानिति पाणिन्यनुक्तं हेयमेवेति चेत्, न। पाणिन्यनुक्तस्य हेयत्वे वार्तिककीर्तितस्यापि हेयप्रसङ्गात्। न च

---

[120] See Vakyap adiya, I. 142, 145.

[121] MB. vol. I, p. 12: पाणिनिना प्रोक्तं पाणिनीयम्।

[122] Pa. IV. 3. 101. See also K.

[123] ibid IV.3. 116.

In Public domain, Digitization Muthulakshmi Research Academy

सूत्रवार्तिककारयोरसर्ववित्त्वेऽपि भाष्यकारस्तु भगवान् शेष एवेति तस्मिन्नज्ञातृत्वशङ्काभावात् तदनुक्तं हेयमेवेति वाच्यम्। ज्ञातृत्वे,,प्यानन्त्यवशादनुक्तिसम्भवात्। अन्यथा आकृतिगणादीनि कुतस्तेन परिच्छिन्नानि ? इत्यास्तां तावत्।।

28, [Objection:] Because Pānini made his rules after considering the ancient treatises as well as the usages and removing those deserving rejection, what is not said by Pānini is indeed to be rejected. [Answer:] This cannot be. If what is not said by Pänini is to be rejected, it amounts to the rejection of what is explained by the Värttika too. It cannot also be said that although the authors of the Sutras and the Vārtika are not omniscient, there cannot be any doubt about the omniscience of the venerable author of the *Bhasya*, who isverily Sesa himself[124], and what is not said by him is to be rejected; for even though he knows everything, it is possible that he has not said everything because there is no end of the things to be said[125]. Otherwise, why should he determine the *akrıtigana*, etc., this is sufficient for the present.

29. तेनैवमेव वक्तव्यम् –

---

[124] Ananta, the thousand-tounged mythical serpant.

[125] cf. MB. vol. 1, p. 5: अनभ्युपाय एव शब्दानां प्रतिपत्तौ प्रतिपदपाठः - Prakriyā Kaumudi, vol. II, p. 794: आनन्त्यात् सर्वशब्दा हि न शक्यन्ते,,नुशासितम्।

In Public domain. Digitization Muthulakshmi Research Academy

दृष्ट्वा शास्त्रगणान् प्रयोगसहितान् प्रायेण दाक्षीसुतः

प्रोचे, तस्य तु विच्युतानि कतिचित् कात्यायनः प्रोक्तवान्।

तद्भ्रष्टान्यवदत् पतञ्जलिमुनिस्तेनाप्यनुक्तं क्वचि –

ल्लोकात् प्राक्तनशास्त्रतो,,पि जगदुर्विज्ञाय भोजादयः।।

अतः सिद्धं पाणिनीयमूलभूतत्वात् पूर्वशास्त्राणां प्रामाण्यमनिवार्यमिति। तदप्युक्तम् – **पूर्वोक्तं पाणिनिश्चाप्यनुवदति** इति।।

29. It is, therefore, to be concluded as below: The son of Dākşi[126] explained [the science of grammar] after considering several [previous] treatises along with the usages; those [points] which were left out by him were explained by Katyāyana; the sage Patanjali explained those that were not noticed by Katyayana; and what is not said even by him is explained by Bhoja and others after seeing some of the usages and [also] the ancient treatises.

Therefore it is evident that the authority of the ancient treatises which were the source for Pānini's work cannot be questioned. This is what is meant by Panini also quotes what is said by his predecessors.

---

[126] cf. MB. vol. I, p. 75 : सर्वे सर्वपदादेशा दाक्षीपुत्रस्य पाणिनेः।

In Public domain. Digitization Muthulakshmi Research Academy

30. नन्वस्तु तावदेवमविरोधस्थले ; पाणिन्यादिवचनविरोधे तु शास्त्रान्तरोक्तं बाध्यमेव ; इति चेत्, न। तेषामपि प्रमाणत्वेनाबाध्यत्वस्य स्थितत्वात्। उदितानुदितहोमवत्, षोडशिग्रहणाग्रहणवच्च विकल्पस्यैव प्रकल्प्यत्वात्। अत एव स्मृतिचन्द्रिकादिषु स्मृतिकारवचनयोर्विरोधे सति द्वयोरपि विकल्पेन ग्राह्यत्वं तत्र तत्रोच्यते।

तत्र तत्र विकल्पार्थं पूर्वाचार्यानुदीरयन्।
मतभेदे द्वयं ग्राह्यं ज्ञापयत्वेव पाणिनिः।।

30. [Objection:] Let it be as said above in the instances where there is no disagreement, but where there is a disagreement [of other works] with what is said by Panini, what is said in other treatises should become nullified.

[Answer:] This is not correct. For, the fact that they cannot be nullified has come to stay on account of their having authority. As in the case of 'the offering of the oblations after the sun rise or before the sunrise[127] and, 'in taking up or not taking up the şodasigraha,[128] here also an alternative alone is to be assumed. That is why in the Smrticandrika[129] and other works, at many places, where a disagrement between the statements

[127] Kausitaki Brāhmana, II. 7. - 16
[128] Maitrāyanīya-samhitā, IV. 7. 6.
[129] The well known work of Devanabhatta.

In Public domain. Digitization Muthulakshmi Research Academy
by the authors of moral codes is found, both (views) are maintained acceptable as alternatives.

In many places by mentioning the [names of] ancient teachers for the sake of making the rule optional,[130] Pāṇini verily indicates that in case of a difference in views both are to be accepted (as alternatives).

31. न चैकस्यैव शब्दस्य शास्त्रद्वयेन साधुत्वमसाधुत्वं च बोध्यत इति वस्तुतो द्वैरुप्यायोगेन विरोधस्यैव युक्तत्वात् न ग्रहणाग्रहणानुष्ठानवद् विकल्पसम्भव इति वाच्यम्। नहि केनापि शास्त्रेण शास्त्रान्तरोक्तस्यासाधुत्वं बोध्यते। किन्तु लक्षणशिष्टप्रयोगरहिताः शब्दा असाधव इति दिक्प्रदर्शनन्यायेन बोधितं भवतीति नियमपरत्वदूषणावसर एव भाषितम्। किञ्च षोडशिग्रहणमपि शास्त्राभ्यामदृष्टहेतुत्वेन प्रत्यवायहेतुत्वेन च बोधितमिति कथं तत्र श्रुतिशरणानां विकल्पेनापि प्रवृत्तिसिद्धिरिति पृष्टे यः परिहारः स एवात्रापि भविष्यतीति सिद्धं विरोधप्रतिभानेऽपि विकल्पेन ग्रहणमिति। तदिदमुक्तम् – **विरोधे,,पि कल्प्यो विकल्पः** इति।।

31. [Objection:| Because two treatises speak of the correctness and incorrectness for the same word, actually there are no two words; so it is proper [in such cases] to maintain a conflict; and as such there is no

[130] Pa. VIII. 3. 19, etc.

In Public domain. Digitization Muthulakshmi Research Academy

possibility of an alternative as in the case of 'the taking up or not taking up (of the *şodasigraha*).

[Answer:] This cannot stand. No treatise instructs [us of] the incorrectness of what is said by another treatise. We are only instructed by way of showing the direction that the words which are not accounted for by rules or usages of the righteous are incorrect. This is already said at the time of criticising the view that the (Paninian) rules are restrictive. Moreover, the taking up of or not taking up *şodasi* is also enjoined by the two rules maintaining it to be a cause of either an unseen [merit] or an offence. So, to the question how in this case there could at least be an optional activity for those who resort to *sruti*, there must be an answer; and the same answer will hold good here too. Thus it is proved that even if there be an appearance of conflict, either (alternative) is to be accepted. This is what is meant by 'even in the case of a conflict an alternative is to be assumed'.

32. किञ्च विरोध एव पाणिनीयेतरवचसोर्न सम्भवति। तत्र विधिसूत्रेषु तावद् **एतेभ्य एवायं प्रत्ययो भवति** इत्यादिनियमो न सम्भवति ; अप्राप्ते नियमायोगात्। न च **सर्वं वाक्यं सावधारणम्** इति न्यायेन नियमः शङ्कनीयः। अयोगव्यवच्छेदेनाप्यवधारणसम्भवात्। अन्यथा अप्राप्तविधि नियमविधिद्वयकथाप्युच्छिद्येत। तस्मादप्राप्तविधिषु तावत् परशास्त्रैरधि-

In Public domain. Digitization Muthulakshmi Research Academy

कोक्तौ न विरोधः। यत्र तूत्सर्गतः प्राप्तावपवादतया नियमार्थं सूत्रं तत्रापि परैरधिकोक्तौ क्वचिदपवादविषयेऽप्युत्सर्गो भवति इति न्यायादविरोधः।।

32. Further there can be no conflict between the words of Pänini and others. In the informative aphorisms there cannot be any restriction that 'this suffix is added only to these stems; for there can be no restriction with regard to something which is not previously known[131]. Nor can a restriction be presumed on the ground of the maxim 'all statements are emphatic (in their meaning)', for the emphasis is even possible for the exclusion of what is not previously known. Otherwise there would be no room for the two types of rules, informative and restrictive. Therefore in the case of informative rules there can be no conflict with other rules even if they contain something extra. And in the case of an aphorism which is restrictive by way of its being an exception to the general rule, there can be no conflict [with others] even if others say something extra; because there is the [accepted] maxim, 'In some places even in the realm of an exception the general rule can operate?[132].

---

[131] C. F. सिद्धे आरभ्यमाणो नियमाय।

[132] MB on Pa. VIL. 4. 82. (Vā. 2) अनभ्यासविकारेष्वपवादा उत्सर्गान् न बाधन्त इत्येषा परिभाषा कर्तव्या।

In Public domain. Digitization Muthulakshmi Research Academy

33. न च पाणिनिना न इत्युक्ते परैः अस्ति इत्युच्यमाने विरोधः; ज्ञापकगणनञ्निर्दिष्टान्यनित्यानि इति नञ्निर्दिष्टस्यानित्यत्व-कथनेन परविरोद्धत्वाभावात्। न च भाष्याद्युक्तयुक्तिभिर्विरोध इति वाच्यम् ;

युक्तयो न्यायवाक्योत्था न्यायाश्च ज्ञापकोद्भवाः।

ज्ञापकोक्तास्त्वनित्याश्च न चानित्या विरोधिनः।।

युक्तस्यैव शब्दसिद्धिश्चेद् विप्लुता शब्दसाधुता।

तस्माद् दृढप्रयोगान् वा पूर्वव्याकरणानि वा।।

आलम्ब्यैव हि युक्त्यापि साधयन्ति मनीषिणः।

अत एव हि युक्त्युक्त्या साधने वक्तृचिन्तनम्।।

तस्माच्छब्दाभियुक्तानां युक्त्या द्वेधापि साधने।

समूलत्वाद् द्वयं ग्राह्यमविरोधश्च वर्णितः।।

33. It is not to be maintained that where Pänini says ‘no’ while others 'yes' there will be a conflict; for by [the maxim] ‘those’ [rules] which are conveyed by the method of implication or inclusion in a *gana* or expression of a 'no' are not peremptory'[133], it is stated

[133] See Paribhāşenduśckhara: ज्ञापकसिद्धं न सर्वत्र (125) नञ्घटितमनित्यम् (987), गणकार्यमनित्यम् (96). PS, Nyayakhanda: समासान्तागमसंज्ञाज्ञापकगणनञ् निर्दिष्टायनिन्त्यानि।

 In Public domain. Digitization Muthulakshmi Research Academy
that what is conveyed by [the expression] 'no' is not peremptory; so it (what is conveyed by 'no') cannot be in conflict with others. Nor can it be said that there can be a conflict with the arguments advanced in the *Bhāṣya*, etc. For,

The arguments are based on the technical maxims and technical maxims are obtained through implications. Those which are conveyed by implications are optional; and those which are optional cannot be conflicting.

If the [correct] words were to be known through reasoning alone their correctness will be thrown into confusion. Therefore the wise prove the [correctness of] words depending upon firm usages and ancient grammars even while reasoning is employed. That is why in maintaining [the correctness of] a word by reasoning, the consideration of the speaker arises.[134]

Therefore when those are enlightened in the language prove a word in two ways by their reasoning; both are to be accepted because both of them have some basis. And the absence of a conflict has already been explained.

34. न च क्वचिद् ज्ञापकं विना,,पि **विप्रतिषेधे परं कार्यम्** इति साक्षाद् वचनमेव युक्तिः स्यादिति तत्रानित्यत्वाभावाद् विरोध इति वाच्यम्। साक्षाद् वचनेऽपि विधिनिषेधकोट्योरविरोधस्य प्रागुक्तत्वात्। तत्

---

[134] Namely, whether he is trustworthy (äpta) or not.

In Public domain. Digitization Muthulakshmi Research Academy

सिद्धमविरुद्धत्वात् सर्वव्याकरणानां समप्रामाण्यम्। तदिदमुक्तं विरोधस्यासम्भवद्योतकेन विरोधेऽपि इत्यपि शब्देन।।

34. [Objection:] In certain places even without an implication the reasoning is expressly conveyed as in the case of the aphorism, "When rules of equal force are in conflict with each other, the latter (in the order] is to take effect[135]; and in such cases there will be a conflict as it (i.e., what is expressly conveyed) is not optional.

[Answer:] This is not correct; because even in the case of an express statement, it has been previously pointed out that there is no conflict between the affirmative and negative points. Therefore, all grammars are equally authoritative as they are not in conflict with each other. This is what is meant by the word 'even' in (the phrase) "even if there be a conflict which indicates that there can be no conflict.

35. नन्वस्तु तावदेवं पूर्वव्याकरणानामार्षत्वेन प्रामाण्यम् ; अर्वाचीनभोजबोप्पदेवादिवचनानां तु कथं कथ्यत इति चेत्, तत्रापि न खलु बहुविदामस्ति निर्मूलवाक्यम् इति ब्रूमः। भाष्यादिकथितसकललक्षणानुकथनादिपरिनिश्चतबहुविद्भावा हि

---

[135] Pā, I. 4. 2.

 In Public domain. Digitization Muthulakshmi Research Academy

भोजादयः शास्त्रान्तरमहाजनप्रयोगादिमूलमालम्ब्यैव शास्त्राणि प्रणीतवन्त इति पाणिनीयवत् तेषामपि प्रामाण्यमेव। त्रिमुनिव्याकरणे उत्तरोत्तरं च प्रमाणमित्यत्रापि बहुवित्त्वमेव उत्तरोत्तरप्रामाण्ये हेतुः। दृष्टहेतुसम्भवेऽदृष्टहेतुकल्पनानुपपत्तेः। तच्च बहुवित्त्वं भोजादीनामपि समानमिति तेषां विशेषादरणीयत्वमेवेति।।

35. [Objection:] Now let it be that the ancient grammars are authoritative because they are the compositions of sages. But how could one speak of the authority for the words of Bhoja, Boppadeva, etc., who belong to the later times.

[Answer:] Even to this (objection) we say 'those who know much do not speak without basis'. Bhoja, etc., who definitely know much because of their interpretation of all the rules found in the *Bhāṣya*, etc., must have composed their treatises depending upon other rules and the usages of competent people; therefore, those (works) also indeed have authority just like the works of Pāṇini and others. In holding that in the grammar of the trinity of sages there is the gradation of authority in the order of sequence, the reason for such gradation should be nothing but 'knowing much more'. For, it is not proper to assume an unseen reason when a seen one is feasible, And such a 'knowing much more' is equally possible with

In Public domain. Digitization Muthulakshmi Research Academy
Bhoja and others also. Therefore, they deserve indeed special respect.

36. **न खलु बहुविदाम्** इत्यस्यान्यो,,प्यर्थः। निर्मूलं खलु व्याकरणान्तराप्रमाण्यं बहुविदो न वदेयुः। एतदपेक्षया तावद् बहुविदां विद्यारण्यादीनां तदकथनात्। तस्माद् बहुग्रन्थवेदित्वाभावादेवायं प्रतिवादी निर्लज्जमेव निर्मूलवाक्यं प्रलपतीत्युपहसनीयमेवेति।

पूर्वव्याकरणादि मूलरहितं युक्त्यैव यत् साध्यते
कैश्चित्तत्र मुनित्रयाप्रतिहते हेयत्वमुद्घोष्यते।
अन्येभ्यो गुणवत्तया च बहुभिर्यद् गृह्यते खल्विदं
तस्मात् खल्पयमन्यशास्त्रमखिलं मिथ्येति विभ्राम्यति।।

इति।

36. The clause beginning with 'those who know much' has another meaning also. Those who know much will not make the baseless statement that other grammars are not authoritative. Even Vidyāraṇya, who definitely knows more when compared to these persons have not said so. Therefore only due to lack of acquaintance with many treatises this opponent prattles without any base and sense of shame; so he deserves nothing but ridicule.

Through argumentations certain persons attempt to

 In Public domain. Digitization Muthulakshmi Research Academy

prove the ancient grammars baseless; and proclaim them unacceptable [although] the trinity of sages has not repudiated them. The fact is that many people accept this (the grammar of the three sages) because it has more merits when compared with others; that is why this person mistakes all other treatises to be false.

37. एवमस्माभिर्व्याकरणान्तरप्रामाण्ये साधिते सति यत् पुनः परेणाप्रामाण्यसाधनं कृतं तदर्थाद् गर्भस्रावेण गतमपीदानीं प्रत्येकयुक्त्युपादानेन खण्ड्यते।।

37. In this way, by establishing the authority of other grammars though the attempt of the opponent to establish their non-authority has' been implicitly washed out, his arguments will be repudiated now by showing detailed reasons.

38. तत्र यत् तावदुक्तं शङ्कराचार्य प्रभृतिभिः श्रुतिव्याख्यादिषु **पाणिनीयमेव गृहीतमिति तस्यैव प्रामाण्यम्, अन्वव्याकरणानां व्याख्यानागृहीतत्वादप्रामाण्यम्** इति तदसारम्। शङ्कराचार्य-मुरारारिप्रभृतिभिरपि स्वप्रयोगमूलत्वेन व्याकरणान्तराणामङ्गीकरणात्। व्याख्यादिषु ग्रहणाग्रहणयोः बहुप्रसिद्ध्यल्पप्रसिद्धिनिबन्धनत्वेन प्रामाण्याप्रामाण्यप्रयोजक-त्वाभावात्। विद्यारण्यादिभिश्च **अल्पमेधः** पदादिव्याख्याने, क्षीरस्वामिसर्वानन्दसुबोधिनीकारादिभिश्च अमरसिंह निघण्टु-व्याख्याने तत्र तत्राङ्गीकृतत्वाद् वेदनिघण्टुव्याख्यात्रा च भोज

In Public domain. Digitization Muthulakshmi Research Academy
सूत्रस्य सर्वत्राङ्गीकृतत्वाद्,व्याख्यानादिष्वपरिगृहीतत्वास्याप्यसिद्धेः। पाणिनीयप्राक्काले च तेषामेव प्रामाण्यमङ्गीकार्यम्। न च सिद्धस्य प्रमाण्यस्य नाशे कारणमस्ति इत्याद्युक्तमेव।।

38. It has been said (by. the opponent) that *Sankarācārya* and others while interpreting the revealed texts have accepted Paninian grammar alone; So it alone is authoritative. The other grammars do not have authority because they are not accepted for the sake of interpreting |the revealed texts].

This is flimsy. Even *Sankarācārya, Murāri* and others have accepted other grammars as the basis of their, usages. The acceptance or non-acceptance for the sake of interpretation is due to their (i.e., the grammars) being known more widely, or less; they (i.e., the acceptance or non-acceptance) do not serve, in establishing authority or non-authority. The argument itself that they (i.e., the other grammars) are not accepted for the purpose of interpretation is not correct;: for *Vidyāranya* while considering the word. *kathāpayati*, the author of *Prasada*[136] in many places of his commentary, *Visveśvara* - the commentator on

[136] VItthala, the commen tator on the Prakriyākaumudi.

In Public domain. Digitization Muthulakshmi Research Academy

Naisadha[137] - in interpreting the word alpamedhas, *Kşirasvām*,[138] *Sarvänanda*[139] and the author of the *Subodhini*[140] in interpreting the Lexicon of *Amarasimh* have accepted them (i.e., the other grammar). in the course of their commentaries. The commentator on the Vedic Lexicon[141] has accepted the aphorisms of *Bhoja* throughout. And in the age before Pānini their authority alone has to be accepted. It has been already said that there is no reason for the fading away of the authority once established.

39. यत्तु मुनित्रयवचनस्य एत एव साधुशब्दाः इति नियमपरत्वाद् एतद्विरोधादन्यशास्त्राणां त्याज्यत्वमुक्तम्, तदपि नियमस्य शास्त्रस्वभावत्वे पाणिनिनियमितत्वाद् वार्तिकाप्रामाण्यं स्यादिति बहुधा परोक्तनियमपरत्व-निरसनादपास्तमेव। विरोध चैकमेव ग्राह्यमित्येतच्च

---

137 Padavākyārthupañcikā, Adyar Library, MS. No. 68474. Descriptive Catalogue, vol. V, S. No. 174. On leaf No. 128: मन्दाल्पाभ्यां च मेधाद् इति महोपाध्यायवर्धमानस्सू (सू)त्रम्।

138 The Commen tary is called Amarakaśodghät ana. Edn. Poona, 1913, 1943.

139 The commentary is called Tikāsarvasvam. The author belonged to the Vandi-........atiya family and the work was composed in 1160 A.D.

140 This is a very elaborate commentary on the Amarakośa by Jataveda-dīksfta Son of Devanabhatta. The author is supposed to have fourished in the latter part of the twelfth century.

141 Durgacarya, the commentator on the Nirukta of Yaska.

षोडशिग्रहणाग्रहणादौ स्मृतिचन्द्रिकाद्युक्तस्मृतिद्वयोक्त-विकल्पनीयत्वे च व्यभिचरितमित्युक्तप्रायम्। विरोधश्च नियमाभावान्नास्तीत्युक्तम्।।

39. Then it is said (by the opponent) that the other grammars are. To De rejected because of their conflict with what is said by the trinity of sages, whose rules are restrictive that 'these alone are correct words'. This [argument| has also been set aside by refuting in more than one way the restrictive nature [of Paninian rules] advanced by the opponent. The reason is also shown that if the Paninian rules are restrictive, the vartikas would also become non-authoritative. The argument that where there is a conflict between two views either alone must be accepted is also shown as inconclusive in the instances of "the taking up or not taking up of sodaśi' and of the alternatives put forth by two moral codes as represented in the Smrticandrika, etc. That there is no Conflict because of the absence of restriction (in Paninian rules) is also affirmed.

40. यत्तु व्यासोक्तानां प्रातिशाख्यरूपासाधरणव्याकरण-मूलत्वमिति, तदपि न। अपाणिनीयत्वसाम्येऽप्यसाधारण-व्याकरणानामिष्टत्वे साधारणेषु विद्वेषे च निमित्तं नास्तीत्युक्तत्वात्। छान्दससूत्रैः एत एव वेदे साधव इति नियमितत्वेन परमते प्रातिशाख्यप्रामाण्यस्यापि दुःसाधत्वाच्च।।

In Public domain. Digitization Muthulakshmi Research Academy

40. [The opponents' view] that the usages of Vyasa are based on the special grammars called Pratisākhyas, is also not correct. Because it has already been pointed out that when both are equal in respect of their being non-Paninian, there is no reason to favour the special grammars and hate the general ones. In addition, it will be hardly possible in the view of the opponent to maintain the authority of the *Pratisākhyas*, in as much as (according to him) the rules (of Pänini) on the Vedic language have already laid down the restriction that 'these' [usages] alone are correct in the *Vedas*'.

41. यत्तु आचार्यसङ्कीर्तनस्य विकल्पाद्यर्थत्वेनोपपत्तेः न तत्प्रामाण्यमङ्गीकृतमिति, तदपि न। **तन्मतमेवं तन्मतमेवम्** इति तन्मतस्य प्रामाण्यानङ्गीकरणे विकल्पस्यैवासिद्धेः स्ववाग्विरुद्धत्वात्। न च सङ्कीर्तनमात्राद् विकल्प उत्तिष्ठति। प्रामाण्यानङ्गीकारे पूजार्थत्वं तु दूरापास्तम्।।

41. Then it has been said that since the references to the names of ancient teachers can be explained by assuming the purpose of making the rules optional, their authority has not been accepted. This is also not true. While saying 'this is my view and this is his', if the authority of the other is not accepted, there can be no alternative at all; so it is self-contradictory. By simple mentioning of the name [of the teachers] the rule cannot become optional; and if [their] authority is not

In Public domain. Digitization Muthulakshmi Research Academy

accepted, there is no question of maintaining them (i.e., the references) as indicating reverence.

42. यत्तु मीमांसादावनभिमताचार्यसङ्कीर्तनवदिदमुपपन्नमिति, तन्न। तत्र दूष्यत्वेनैव तन्मतोपादानात्। इह तु तदभावात्। न च **तत्र प्रमाणं बादरायणस्यानपेक्षत्वाद्** इत्यादौ ग्राह्यतासङ्कीर्तनेऽपि देवताविग्रहवत्त्वादौ तन्मतस्य परित्यागदर्शनादत्रापि तथा इति वाच्यम्। तत्रापि मतभेदेन सर्ववैदिकपक्षाणां गृह्यमाणत्वदर्शनात्।।

42 Then it has been argued that this (i.e., references to ancient teachers) can happen as is found in the *Mimansa*, etc., where the name of unacceptable predecessors are (some' times) mentioned. This is also not sound; for there the other's view is mentioned for criticising it; whereas here there is no such thing. [The argument] that though in (the *Mimāmsā-sutra*) - *tatpramānam badarāyanasyānapeksatvāt*[142] the other's view is mentioned as acceptable, while discussing the deities having a body, etc.[143], other's

---

[142] Jaimini-sütra, I. 1. 5.

[143] ibid. X. 4. 23. Although Jaimini does not explicitely say that deities'to whom oblations are offered do not have a physique, Sabara states: नन्वेवं शब्द एव देवता प्राप्नोति। अत्रोच्यते। नैतदस्माभिः परिहर्तव्यम्। न हीदमुच्यमानमस्मत्पक्षं बाधते। Also see Khandadeva on this. cf. Naişadhlya-carita, V. 39:

 In Public domain. Digitization Muthulakshmi Research Academy
view is rejected; so here (in the case of grammar) also the same can happen is un-sound. For there also all Schools of the Vedists are found to have been accepted as different Views.

43. यत्तु कौमुदीकारादिभिः स्वबुद्धिविस्तारबोधनार्थमेव मतान्तरप्रदर्शनं कृतम्, न तत्प्रामाण्यादिति, तदप्यबद्धम्। अप्रमाण्यभूतस्य कथने स्वबुद्धिमान्द्यस्यैव प्रकाशन-प्रसङ्गादिति। एव परोक्तावस्मदुक्तविरुद्धों,,शः खण्डितः।

ततोऽन्यग्रन्थसन्दोहैर्मदुक्तान्येव साधयन्।

वैनतेयो ममात्यन्तं बन्धुरेवेति शोभनम्।।

43. It has also been said that the author of the *Kaumudi* and others have quoted the views of others in order to reveal the expansion of their Own intellect, and not because of others' authority. This [argument| lacks coherence. By quoting something which is not authoritative, the dullness of the intellect alone could be revealed. Thus in the opponent's contention those points which go against what we have said are refuted.

Therefore, everything is fine; because *Vainateya*! Who

विश्वरूपकलनादुपपन्नं तस्य जैमिनिमुनित्वमुदीये।

विग्रहं मखभुजामसहिष्णुर्व्यर्थतां मदशनिं स निनाय।।

In Public Domain, Digitization-Muthulakshmi Research Academy

by citing a multitude of others' works only establishes what I have said, is indeed, a very close friend of mine.

******

हे ! श्रीमच्चोळदेशप्रथितबुधवराः शब्दशास्त्रान्तराणां

कोऽप्यप्रामाण्यमूचे किमपि निगदितं तत्र चास्माभिरेवम्।

कौमुद्यां धातुवृत्त्यादिषु कथिततया वैदिकाङ्गत्वसाम्याद्

युष्माकं सम्मतं स्यादिति लिखितमिदं शोधयध्वं महान्तः।।

श्रीसोमेश्वरदीक्षिताभिधमहाविद्वत्कुलाग्रेसरा

मीमांसाद्वयशब्दतर्ककुशला युष्मानधृष्योन्नतीन्।

तत्त्वज्ञान् करुणानिधीन् प्रशमिनः श्रुत्वेदमभ्यर्थये

यत् किञ्चिल्लिखितं मयाऽत्र तदितं स्वीकार्यमार्यात्मभिः।।

युष्माभिः खलु कामदेवविजये व्यालेखि कक्ष्याक्रम-

स्तं द्रष्टुं भृशमुत्सुका वयमतः सम्प्रेष्यतां साम्प्रतम्।

युष्माद्दक्षविचक्षणोक्तिपदवीसम्प्रेक्षणेन क्षणा-

दस्माकं खलु बुद्धिशुद्धिरुदियादित्येष(रुदयेदि) तत्राशयः।।

In Public domain. Digitization Muthulakshmi Research Academy

प्रयुक्तहेतौ सति कामदेवे कृतोऽस्य भङ्ग पटुदर्शनेन।

सोमेश्राख्याग्रहणस्य(ग्रगणस्य) चैतत्सर्वज्ञभावस्य च युक्तरूपम्।।

युष्मद्वैदुष्यधूतं(धूतः) खलु कटकभुवि त्रायते भोगिराजं(राजो)

वाणीवेणीविधूतामपि सुरसरितं(सरितः)

कङ्कटीको जटायाम्(जटायाः)।

इत्येवं यज्ञनारायणविबुधमहादीक्षिताः शत्रुवर्ग-

त्राणाद् देवस्य तस्याप्यपहरथ

धिया साधु सार्वज्ञ्यगर्वम्(सर्वज्ञगर्वम्)।।

युष्मास्वेव क्षितीशो विपुलनयनिधिस्तिष्ठते राज्यदृष्टौ

तिष्ठध्वे यूयमेव प्रथितबुधजने सन्दिहाने समेते।

युष्मभ्यं तिष्ठते कस्त्रिदशगुरुसमानोऽपि युष्मादृगन्यः

प्रज्ञालुर्यं ज्ञनारायणविबुधमहादीक्षिता वीक्षते कः?।।

(प्रज्ञालून्, प्रज्ञालो) (दीक्षितान् वीक्ष्यते)

अस्वस्थाः केलस्थाः स्वयमतिमृदवस्तत्र चाहं विशेषात्

सर्वे दुरप्रचारे खलु शिथिलधियः किं पुनर्देशभेदे।

एवंभावेऽपि दैवात् कुहचन समये कल्यताकल्यते चेत्

In Public domain. Digitization Muthulakshmi Research Academy

प्रज्ञाब्धीन् यज्ञनारायणविबुधमहादीक्षितानीक्षिताहे।।

O! The renowned scholars of the celebrated Cola region!, someone declared the other grammars (than that of Pāṇini) to be devoid of authority; there upon we also said something as above. Since this (what I have said) has been enounced in the [works like] *Kaumudi* and *Dhatuvrtti* on the basis of their (i.e., the other grammars) being equally an auxiliary to the Veda (as the Paninian grammar), I have written down this with the hope that this would be acceptable to you, O! The eminent [scholars]! You may kindly scrutinize this.

O! Sri *Someśvaradikşita*![144] The foremost among the learned! O! The erudite in the Mimamsās, grammar and logic! Having heard of you as one of invincible nobility knowing the truth (of things), a reservoir of kindness and well composed, I entreat: Here is something written by me; you, the high minded, may kindly accept this.

You have written (it is known), the counter arguments in the *Kadmadevavijaya*[145]. We are extremely anxious to see it. It may therefore be immediately sent (to us). The idea [of this request] is that seeing the method of

---

144 He is yet to be identified.

145 According to the New Catalogus Catalogorum, vol. III, p. 348. *Kāmadeva-vijaya* is a work on grammar written by *Somesvara* in reply to a work by Kāmadeva.

 In Public domain. Digitization Muthulakshmi Research Academy
argumentation set forth by the clear sighted [scholars] like you, we may get our thoughts clarified at once.

When Kämadeva'[146] employed the reasoning (also directed the weapon)[147] its (also his) destruction was effected by you through effective observations (also glance).[148] This is indeed proper for one who owns the name *somesvara* and is omniscient.

There is the god who having armoured himself well protects the king of serpents, who was pushed aside by your erudition, by placing him as a bracelet; and the divine river who was cast away by the force of your oration, by placing her in his matted hair. In this way, O! The learned *Yajnanārāyana Dikşita*! you steal away, by your intelligence, the pride of omniscience of even that god, who affords protection to your enemies.[149]

---

[146] An author of that name as well as the god of love:

[147] The word hetau is taken here as the saptami of hetu with reference to the author Kāmadeva and hetu with referenee to. Kāmadeva (god of love)

[148] Someśvara Dīkşita retaliated the arguments of the author Kāmadeva by critical observations, while God Siva destroyed Kāmadeva by His glance.

[149] The thousand-tongued mythical serpent is supposed to be having infinite knowledge. The power ot speech is, always compared to the force of current of *Gañgā*: The idea seems to be that Siva is protecting them without knowing their defeat at Yajñanārāyana's hands. The knowledge of the scholar, therefore, surpasses that of the God.

The King who is extensively learned in Politics depends on you to take decision in the matters concerning the country; when renowned scholars assemble with some doubt, you alone stand as the judge; who, even if he be equal to the preceptor of the gods, can stand up to you?[150] O! Yajnanārāyaṇa Dikşita! Can any other person who equals you in wisdom be found?

The people in Kerala in general are very delicate and sickly, and especially so is my humble self. Everyone is lukewarm towards travelling even a distance; what about then going to another region? In spite of ṭhis, if by chance at some time health would allow me to have it; I will certainly meet the great scholar Yajnanārāyana Dikşita, the ocean of wisdom.

---

[150] The root *sthā* in *ātmanepada* 1s used here in its various meanings. In the first second instances, it is according to Pa. I. 3. 23. *Prakāśana-stheyākhyayoś ca.* PS under ibid. states that Bhatti, etc., Interpret the word *stheya* as one who depends on others for taking a decision or who himself is the judge when others seek a decision. Here the root is used in both the senses, respectively. The third sense 'to stand up to is found in the third usage of the root in the verse.

In Public domain. Digitization Muthulakshmi Research Academy

अपाणिनीयाः (उणादि) प्रयोगाः

काव्यस्य *क्वचित्सुयोज्या धात्वर्थाः काप्योज्या उणादिषु*[151] इति व्याख्यानोक्त्या ज्ञायते यत् काव्ये उणादिप्रयोगाणां वैशिष्ट्यमपि विद्यत इति। अतः तेषाम् उणादिसूत्राणामौचित्यं किमस्तीति विचारस्यावश्यकता वरीवर्ति। वस्तुतः शब्दनिष्पत्तौ येषां यौगिकत्वं क्लिष्टं तेषां सिद्धये उणादिसूत्राणि प्रोक्तानि इति विदुषां मतम्। किञ्च तेषामुपादेयत्वविषये पण्डितानां नैकमत्य भजते। किन्तु पाणिनिः सर्वानेव शब्दान् यौगिकान् मन्यते। येषां सुस्पष्टं यौगिकत्वं ते हि शब्दानुशासने व्याख्याताः। येषाञ्च यौगिकत्वं क्लिष्टं तेषां सिद्धये उणादिसूत्राणि प्रोक्तानि। तानि च *उणादयो बहुलम्(अष्टा.3.3.1)* इति सूत्रव्याख्यावसरे के च ते उणादयः, इति शिष्यैः पृष्टः आचार्यः पञ्चपादीन्युक्तवान् यस्या व्यवस्थितं स्वरूपमेव दशपादी। अस्यां प्रायः 759 सूत्राणि प्रोक्तानि। तेषामेव सूत्राणां सहयोगेन अभिनवशब्दोत्पत्तिरपि शक्यते। तेन लौकिकशब्दानाम् अपाणिनीयानीयत्वमेव न भजते। तथैव काव्येष्वपि उणादि सूत्राणामुदाहरणानि अपाणिनीयानि इति न कथ्यते। धातुकाव्ये च तेषां सूत्राणामुदाहरणानि नैकानि संलक्ष्यन्ते। यथा –

अतर्दकास्त्वद्य विकर्दमाशयाः प्रखर्दवृत्तैरसमन्तितान्तिकाः।

---

[151] धा.का. 3.66

In Public domain. Digitization Muthulakshmi Research Academy

श्रुतान्दुकैश्चित्तगजेन्द्ररोधिनस्तुष्यन्तु सन्तो गुणबिन्दुलोलुपाः।।[152]

इत्यत्र *अति अदि बन्धने* इति धातुः ***अन्दूदृम्भकफेलूकर्कन्धूदिधिषूः****(उणा. 1.90)* इत्यनेन उ प्रत्यये, स्वार्थे कनि ***केऽणः****(अष्टा.7.4.13)* इत्यनेन च ह्रस्वे *अन्दुकैः* इत्युदाहृतम्।

एवमेवान्यस्मिन् श्लोके यथा -

एरवच्चकोरोत्करमिङ्खितं शुकैः, प्रेङ्खल्लतावल्गनरङ्गमण्डपम्।

विलङ्घदेणं शवराङ्गनाजनप्रवङ्गितं मङ्गलधेनुतङ्गितम्।।[153]

अत्र *मगि गतौ* इति धातुः ***मङ्गलेरलच्*** *(उणा. 5.88)* इत्यनेन अलच् प्रत्यये मङ्गलः इति प्रयुक्तः। एवं धातुकाव्ये प्रस्तुतानि नैकानि उणादिसूत्राणामुदाहरणानि प्रतीयन्ते। तेषु कानिचन पट्टके प्रस्तूयन्ते यथा–

क्र.सं.	उणादि सूत्रं प्रत्ययश्च	धातुकाव्यप्रयोगः श्लोकसंख्या च
1	इषमिदमुदिखिदिछिदिभिदिमन्दि (1.50) किरच्	मन्दिरात् 1.3
2	पर्दैर्नित्संप्रसारणमल्लोपश्च (3.82) आकु	पृदाकुः 1.5
3	कृश्टशलिगर्दिभ्योऽभच् (3.121) अभच्	गर्दभः 1.8

[152] धा.का. 1.9

[153] धा.का. 1.20

In Public domain. Digitization Muthulakshmi Research Academy

4	स्फायितञ्चिवञ्चिशकिक्षिपि..... (3.13) रक्	चन्द्र 1.10
5	सलिकल्यनिमहिभिभण्डिशण्डिपिण्डि कुकिभूभ्य इलच् (1.53) इलच्	कोकिल 1.13
6	रङ्घिलङ्घ्योर्नलोपश्च (1.29) उ	लघु 1.15
7	मङ्गेरलच् (5.88) अलच्	मङ्गलः 1.20
8	स्फायितञ्चि......(2.13) रकि नलोपश्च	आवक्र 1.26
9	खजेराकः (4.13) आक	खाजकम् 1.31
10	सलिकल्यनिभटिभण्डितण्डिभ्य इलच् (1.53) इलच्	भण्डिल 1.36
11	दृसनिजनिचरिचटिरहिभ्यो ञुण् (1.3) ञुण्	चाटु 1.39
12	अशुप्रुषिलटिकणिखटिविशिभ्यः क्वन्(1.140) क्वन्	खट्वा 1.41
13	पर्फरीकादश्च (4.20)	पुण्डरीक 1.43
14	वेपितुह्योर्ह्रस्वश्च(2.52) इनच्	विपिन 1.47
15	भृमृदृशियजिपर्व्यमिनमिहर्यिभ्योऽतच् (3.109) अतच्	हर्यतैः, पर्वतः 1.66, 73
16	इण्सिञ्दीङुष्यविभ्यो नक् (3.2)	उष्ण 1.87
17	क्वुन् शिल्पिसंज्ञयोः(2.32)	मशकस्य 1.90
18	पतेरङ्गच् पक्षिणि(1.111) अङ्गच्	पतङ्गाम् 2.22
19	बहुलमन्यत्रापि (2.48) इनच्	नलिनीः 2.22
20	छित्वरच्छत्वर.....(3.1) चीवरशब्दो	चीवरीभिः2.27

In Public domain. Digitization Muthulakshmi Research Academy

	निपात्यते	
21	क्विब्वचिप्रच्छिश्रिदुस्रुकटप्रुज्वां दीर्घोऽसम्प्रसारणं च(2.58) क्विप् दीर्घश्च	श्रियम् 2.29
22	हसिमृग्रिण्वामिदमिलूपूधुर्विभ्यस्तन् (3.87) तन्	गर्तम् 2.34
23	कृषेर्वर्णे (3.4) नक्	कृष्णम् 2.40
24	ऋज्रेन्द्र....(2.28) रनि	क्षुरः 2.47
25	विषेः किच्च(3.39) नु	विष्णुः 2.55
26	घर्मग्रीष्मः(1.138) मक्	घर्म 2.55
27	तृषिशुषरसिभ्यः कित् (3.12) नन्	तृष्णा 2.66
28	कृवापाजिमिस्वदि साध्यशुभ्य उण् (1.1) साधेः उण्	साधोः2.69
29	अर्जिदृशिकम्यमिपंसि बाधाम् (1.17) कु प्रत्ययः दीर्घश्च	पांसुः 3.23
30	स्तनिहृषिपुषिगमिमदिभ्यो णेरित्नुच् (3.29) इत्नुच्	स्तनयित्नु 3.53

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

In Public domain. Digitization Muthulakshmi Research Academy

Sanskrit Academy

Adarsha Shodha Sansthan

(Recognised by Central Sanskrit University, New Delhi)

Osmania University Campus, Hyderabad – 500 007

2022

978-93-80171-78-4